निरुपद्रवः, त्रि, (निर्गत उपद्रवो यस्मादिति।) उत्पातरहितः। यथा,—

"जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम्।
सौम्यदृष्टिभिर्वेदाजा विकले च शुभं वदेत्॥"

इति ज्योतिस्तत्त्वम्॥

निरुपमः, त्रि, (निर्गता उपमा सादृश्यं यस्मात्।) उपमारहितः। अनुपमः। यथा,—

"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।"

इति प्रबोधचन्द्रोदयः॥

निरुपेक्षः, त्रि, (निर्गता उपेक्षा यस्मात्।) यद्वा नास्ति उपेक्षा यस्य सः। अनुपेक्षः। उपेक्षाशून्यः॥

निरूढ़ः, पुं, (नि+रुह+क्तः।) निरूढ़लक्षणाकः शब्दः। यथा,—"पूर्व्वस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढ़ो दायशब्दः।" इति दायभागः॥

निरूढ़लक्षणा, स्त्री, (निरूढ़ा लक्षणा।) शक्तितुल्यलक्षणा। यथा,

"निरूढ़लक्षणाः काश्चित् काश्चिन्नैव त्वशक्तितः।"

इति काव्यप्रकाशटीकायां महेश्वरः॥

निरूढ़ा, स्त्री, (निरूढ़+स्त्रियां टाप्।) लक्षणाविशेषः। यथा। "काचित् लक्षतावच्छेदकीभूततत्तद्रूपेण पूर्व्वपूर्व्वं प्रत्यायकत्वात् निरूढ़ा। यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य।" इति शब्दशक्तिप्रकाशिका॥

निरूपणं, क्ली, (नि+रूप+णिच्+ल्युट्।) आलोकः। विचारः। निदर्शनम्। इति मेदिनी। णे, ६६॥ (यथा, महाभारते। ३। ७१। ३१।

"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम्।
दैवेन विधिना युक्ताः शास्त्रोक्तैश्च निरूपणैः॥"

निरूपयतीति। नि+रूप+णिच्+ल्युः। निरूपके, त्रि। यथा, मार्कण्डेये। १६। ६६।

"एते देवा सहेन्द्रेण मामुपागम्य दुःखिताः।
तद्वाक्यापास्तसत्कर्म्मदिननक्तं निरूपणाः॥
याचन्तेऽहर्निशं संस्थां यथावदविखण्डिताम्॥")

निरूपितः, त्रि, (नि+रूप+णिच्+क्तः।) कृतनिरूपणः। नियुक्तः। इति श्रीधरस्वामी॥ यथा, श्रीभागवते। १। ५। २२।

"निरूपितो बालक एव योगिनां
शुश्रूषणे प्रावृषि निर्व्विविक्षताम्॥"

निरूहः, पुं, (निर्+ऊह मूर्न्ये+घञ्।) वस्तिभेदः। यथा,—

"वस्तिर्द्विधानुवासाख्यो निरूहश्चेतिसंज्ञितः।
यः स्नेहैर्दीयते स स्यादनुवासननामकः।
कषायक्षीरतैलैर्यो निरूहः स निगद्यते॥"

इति सारकौमुदी॥

अथ निरूहवस्तिकर्म्मविधिः।

आत्रेय उवाच।

"चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिलक्षणं कृत्वा तया वस्तिप्रतिकर्म्म कुर्य्यात्।
नातिशीते च काले च न प्रीते नच भोजिते।
न निद्रार्त्ते न मूत्रार्त्ते विष्ठार्त्ते नच वेदभाक्॥
वस्तिकर्म्मनिरूहञ्च कारयेत्तं निरस्य च।

आदौ मूत्रविष्ठोत्सर्गं कृत्वा गुदं प्रक्षाल्य नातिशिथिलशय्यायां शाययित्वा वामाङ्गं वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि संस्थाप्य गुदाभ्यन्तरे द्वाङ्गुलमात्रां नाड़ीं सुधीः सञ्चारयेत्। ततः शनैः शनैः वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात्। निरूहानन्तरं शनैः शनैरुत्तानं शाययित्वोर्द्धीकृत्य च पश्चात् सङ्कोच्य पाणिभिः पञ्चवारान् स्फिक्पिण्डान् चोटयेत्। ततः स्वस्थं कृत्वा शयीनाद्यामाशयं मलस्थानं शोधयति। वस्त्युदरवातान् दोषान् निवारयति। पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः।" इति हारीतोत्तरे सूत्रस्थाने तृतीयोऽध्यायः।

"नरो विरिक्तस्तु निरूहदानं
विवर्ज्जयेत् सप्तदिनान्यवश्यम्।
शुद्धो विरेकेण निरूहदानं
तद्ध्यस्य शून्यं विकषेच्छरीरम्॥"
"विष्वक्स्थितं दोषचयं निरस्य
सर्व्वान् विकारान् शमयेन्निरूहः।
देहे निरूहेण विशुद्धमार्गे
संस्नेहनं वर्णबलप्रदञ्च॥"

इति सिद्धिस्थाने प्रथमेऽध्याये॥

"ससैन्धवक्षौद्रयुतः सतैलो
देयो निरूहो बलवर्णकारी।
आनाहपार्श्वामययोनिदोषान्
गुल्मानुदावर्त्तरुजञ्च हन्यात्॥
यष्ट्याह्वमूलाटरुपलेन सिद्धं
पयः शताह्वाफलपिप्पलीभिः।
युक्तं ससर्पिर्मधुवातरक्त-
वैस्वर्य्यवीसर्पहितो निरूहः॥"

इति सिद्धिस्थाने तृतीयेऽध्याये चरकेणोक्तम्॥) ऊहशून्यः। निश्चितम्। इति मेदिनी। हे, १८॥ निग्रहः। तर्कः। इति हेमचन्द्रः॥

निर्ऋतिः, स्त्री, (निर्नियता ऋतिर्घृणा अशुभं वा यत्र।) अलक्ष्मीः। इत्यमरः। १। ८। २॥ (यथा, महाभारते। १। ८७। ६।

"अरुन्तुदं परुषं तीक्ष्णवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान्।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम्॥")

अस्या उपाख्यानं यथा,—

"समुद्रमथनाद्याति रत्नान्यापुः सुरोत्तमाः।
ऐरावतं कौस्तुभं तेषु विष्णवे प्रददुः सुराः॥
यावद्गृह्णीष्यकारासौ लक्ष्मीं भार्य्यार्थमात्मनः।
तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम्॥

लक्ष्मीरुवाच।

असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते।
तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन!॥
विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः।
तस्मादधर्म्मव्यतिक्रमं न कुर्य्या मधुसूदन!॥

सूत उवाच।

इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय मुनये सुदीर्घतपसे तदा।
आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल॥
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम्।
रक्तारक्तनयनां रूक्षपिङ्गशिरोरुहाम्॥
स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम्।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्॥
होमधूमसुगन्धाढ्यं वेदघोषैश्च नादितम्।
आश्रमं तं विलोक्याथ व्यथिता साब्रवीदिदम्॥

ज्येष्ठोवाच।

नहि वासानुरूपोऽयं वेदध्वनियुतो मम।
नात्रागमिष्ये भो ब्रह्मन्! नयस्वान्यत्र मां ध्रुवम्॥

उद्दालक उवाच।

कथं नायासि किंचात्र वर्त्तते स्वमतं तव।
तव योग्या च वसतिः का भवेत् तद्वदस्व माम्॥

ज्येष्ठोवाच।

वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम्।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम्॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम्॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्म्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादपमाननम्।
निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम्॥

सूत उवाच।

इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह॥

उद्दालक उवाच।

अश्वत्थमूलेऽस्मिन्नलक्ष्मि अस्यतां क्षणम्।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः॥

सूत उवाच।

इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती चिरं तत्र यदा तं न ददर्श सा॥
तदा रुरोद करुणं भर्त्तृत्यागेन दुःखिता।
तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत्॥
तदा विज्ञापयामास विष्णुमुद्विग्नमानसा॥

लक्ष्मीरुवाच।

स्वामिन्मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं याहि कृपालो! यद्यहं प्रिया॥

सूत उवाच।

लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्॥

विष्णुरुवाच।

अश्वत्थमूलमासाद्य सदालक्ष्मीः स्थिरा भव।
ममांशसम्भवो ह्येष आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अस्पृश्योऽसौ भवेत्तस्मान्मन्दवारं विना किल॥
प्रत्यब्दमर्च्चयिष्यन्ति तां ज्येष्ठां गृहधर्म्मिणः।
तेष्वियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया॥"

इति पाद्मोत्तरखण्डे १६९ अध्यायः॥